# दुर्गा चन्द्रकला स्तुतिः

वेधोहरीश्वर स्तुत्यां विहर्त्रीं विन्ध्य भूधरे ।
हरप्राणेश्वरीं वन्दे हन्त्रीं विबुध विद्विषाम् ॥ १॥

अभ्यर्थनेन सरसीरुह सम्भवस्य
त्यक्त्वोदिता भगवद क्षिपिधान लीलाम् ।
विश्वेश्वरी विपद पागमने पुरस्तात्
माता ममास्तु मधुकैटभयो र्निहन्त्री ॥ २॥

प्राङ्निर्जरेषु निहतैर् निजशक्ति लेशैः
एकीभवद्भि रुदिताखिल लोक गुप्त्यै ।
सम्पन्न शस्त्र निकरा च तदायुधस्थैः
माता ममास्तु महिषान्तकरी पुरस्तात् ॥ ३॥

प्रालेयशैल तनया तनुकान्ति सम्पत्-
कोशोदिता कुवलयच्छवि चारुदेहा ।
नारायणी नमद भीप्सित कल्पवल्ली
सुप्रीति मावहतु शुम्भ निशुम्भ हन्त्री ॥ ४॥

विश्वेश्वरीति महिषान्तकरीति यस्याः
नारायणी त्यपि च नामभि रङ्कितानि ।
सूक्तानि पङ्कज भुवा च सुरर्षिभिश्च
दृष्टानि पावक मुखैश्च शिवां भजे ताम् ॥ ५॥

उत्पत्ति दैत्य हनन स्तव नात्मकानि
संरक्षका ण्यखिलभूत हिताय यस्याः ।
सूक्तान्यशेष निगमान्त विदः पठन्ति
तां विश्वमातर मजस्र मभीष्ट वीमि ॥ ६॥

ये वैप्रचित्त पुन रुत्थित शुम्भ मुख्यैः
दुर्भिक्ष घोर समयेन च कारितासु ।
आविष्कृता स्त्रिजगदार्तिषु रूपभेदाः
तैरम्बिका समभिरक्षतु मां विपद्भ्यः ॥ ७॥

सूक्तं यदीय मरविन्द भवादि दृष्टं
आवर्त्य देव्यनुपदं सुरथः समाधिः ।
द्वावप्य वापतु रभीष्ट मनन्य लभ्यं
तामादि देव तरुणीं प्रणमामि देवीम् ॥ ८॥

माहिष्मती तनुभवं च रुरुं च हन्तुं
आविष्कृतैर् निजरसा दवतार भेदैः ।
अष्टादशाहत नवाहत कोटि संख्यैः
अम्बा सदा समभिरक्षतु मां विपद्भ्यः ॥ ९॥

एतच्चरित्र मखिलं लिखितं हि यस्याः
सम्पूजितं सदन एव निवेशितं वा ।
दुर्गं च तारयति दुस्तर मप्यशेषं
श्रेयः प्रयच्छति च सर्व मुमां भजेताम् ॥ १०॥

यत्पूजन स्तुति नमस्कृतिभि र्भवन्ति
प्रीताः पितामह रमेश हरास्त्रयोऽपि ।
तेषामपि स्वकगुणैर् ददतीं वपूंषि
तामीश्वरस्य तरुणीं शरणं प्रपद्ये ॥ ११॥

कान्तार मध्य दृढलग्न तयाऽवसन्नाः
मग्नाश्च वारिधि जले रिपुभिश्च रुद्धाः ।
यस्याः प्रपद्य चरणौ विपदस्त रन्ति
सा मे सदाऽस्तु हृदि सर्व जगत्सवित्री ॥ १२॥

बन्धे वधे महति मृत्युभये प्रसक्ते
वित्तक्षये च विविधे य महोपतापे ।
यत्पाद पूज नमिह प्रतिकार माहुः
सा मे समस्त जननी शरणं भवानी ॥ १३॥

बाणासुर प्रहित पन्नग बन्ध मोक्षः
तद्बाहु दर्प दलना दुषया च योगः ।
प्राद्युम्निना द्रुत मलभ्यत यत् प्रसादात्
सा मे शिवा सकलम प्यशुभं क्षिणोतु ॥ १४॥

पापः पुलस्त्य तनयः पुनरुत्थितो मां
अद्यापि हर्तु मयमागत इत्युदीतम् ।
यत्सेवनेन भय मिन्दिरयाऽ वधूतं
तामादि देव तरुणीं शरणं गतोऽस्मि ॥ १५॥

यद्ध्यानजं सुख मवाप्य मनन्त पुण्यैः
साक्षात् तमच्युत परिग्रह माश्व वापुः ।
गोपाङ्गनाः किल यदर्चन पुण्य मात्रात्
सा मे सदा भगवती भवतु प्रसन्ना ॥ १६॥

रात्रिं प्रपद्य इति मन्त्रविदः प्रपन्नान्
उद्बोध्य मृत्यवधि मन्यफलैः प्रलोभ्य ।
बुद्ध्वा च तद्विमुखतां प्रतनं नयन्तीं
आकाश मादि जननीं जगतां भजे ताम् ॥ १७॥

देशकालेषु दुष्टेषु दुर्गा चन्द्रकला स्तुतिः ।
सन्ध्ययो रनु सन्धेया सर्वापद्वि निवृत्तये ॥ १८॥

इति श्रीमदपय्य दीक्षित विरचित दुर्गा चन्द्रकला स्तुतिः समाप्ता ।